# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-२, सेमेस्टर-३ | प्रश्नपत्रम् - ८ | गुणाः - ७० |
| विषयः - धर्मशास्त्रम् | कोड - CE-2.3.6 | समयः - ०३-०६ |
| दिनाङ्कः - २.१२.२०१६ | ग्रन्थः - मनुस्मृतिः ( मन्वर्थटीकासहिता ) ५तः६ अध्यायौ | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ कयोश्चित् द्वयोः ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या ।** ०८

(१) *अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ।*
*आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ॥*

(२) *नाऽकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।*
*न च प्राणिवधः स्वर्ग्यस्त तस्मान् मांसं विवर्जयेत् ॥*

(३) *अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।*
*प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥*

**प्रश्नः २ कस्याप्येकस्य सविस्तरेण उत्तरं लिखत ।** ०८

*(१) भक्ष्याभक्ष्यविषये के के नियमाः पालनीयाः ? यथाग्रन्थं लिखत ।*
*(२) आशौचविषये सविस्तरेण लिखत ।*

**प्रश्नः ३ टिप्पणीद्वयं लिखत ।** ०४

*(१) मृत्युप्रापकाः ।* *(२) भक्ष्यपञ्चनखाः ।*
*(२) प्रेतशुद्धिः ।* *(४) द्रव्यशुद्धिः ।*

**प्रश्नः ४ पञ्चानां लघूत्तरं लिखत ।** ०५

(१) *शुक्तेषु किं भक्ष्यम् ?*
(२) *कीदृशं मांसं भक्षयेत् ?*
(३) *पशवः किमर्थं सृष्टाः ?*
(४) *कीदृशः जनः लोके प्रियतां याति ?*
(५) *अकृतचूडानां सपिण्डानां बालानां मरणे कदा शुद्धिः भवति ?*
(६) *रजस्वला स्त्री कदा विशुध्यति ?*
(७) *मृतं शूद्रं कस्मात् द्वारात् निष्कासयेत् ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ द्वयोः श्लोकयोः व्याख्यानात्मकमुत्तरं लिखत ।** ०८

(१) *निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति ।*
*अब्जमश्ममयं चैव राजतं चाऽनुपस्कृतम् ॥*

(२) *आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ।*
*अव्यासाश्चेदमेध्येन गन्धवर्णरसान्विताः ॥*

(३) *अपत्यलोभाद् या तु स्त्री भर्तारमतिवर्तते ।*
*सेह निन्दामवाप्नोति परलोकाच्च हीयते ॥*

**प्रश्नः ६ एकस्य सविस्तरेणोत्तरं लिखत ।** ०८

*(१) मनुस्मृत्यनुसारं परिव्राजकधर्मान् सविस्तरेण लिखत ।*

*(२) गृहस्थाश्रमस्य नियमान् – ग्रन्थाधारेण लिखत ।*

**प्रश्नः ७ एकां टिप्पणीं लिखत ।** ०२

*(१) जलशुद्धिः ।* *(२) स्त्रीधर्माः ।*

**प्रश्नः ८ लघूत्तरं लिखत ।( द्वयोः )** ०२

*(१) पञ्चमाध्याये कस्य धर्मस्य उल्लेख अस्ति ?*

*(२) मनुस्मृतौ कति अध्यायाः सन्ति ?*

*(३) तैजसानां शुद्धिः केन भवति ?*

*(४) अश्ममयं भाण्डं केन शुध्यति ?*

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ९ कयोश्चित् द्वयोः ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या ।** ०८

(१) *वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा ।*
*जटाश्च बिभृयान् नित्यं श्मश्रु-लोम-नखानि च ॥*

(२) *आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।*
*भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते ॥*

(३) *दश लक्षणानि धर्मस्य ये विप्राः समधीयते ।*
*अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥*

**प्रश्नः १० एकस्य सविस्तरेणोत्तरं लिखत ।** ०८

*(१) भिक्षाचारे किं किमावश्यकम् विस्तरेण लिखत ।*

*(२) षष्ठाध्यायस्य सारांशं संक्षेपेण लिखत ।*

**प्रश्नः ११ टिप्पणीं लिखत ।( द्वयोः )** ०४

*(१) इन्द्रियनिग्रहः ।* *(२) प्राणायामप्रशंसा ।*

*(३) देहस्वरूपम् ।* *(४) चत्वारआश्रमाः ।*

**प्रश्नः १२ लघूत्तरं लिखत ।( पञ्चानाम् )** ०५

*(१) कति मलाः भवन्ति ?*

*(२) स्नातकः द्विजः कथं वनं व्रजेत् ?*

*(३) धारणया कं दहेत् पापानि ?*

*(४) वस्त्रपूतं किं पिबेत् ?*

*(५) ऋणत्रयम् अनुपाल्य द्विजातिना किं करणीयम् ?*

*(६) ऋणानुबन्धं विना मोक्षेच्छुः द्विजातिः कुत्र गच्छति ?*

*(७) परिव्राजकः अन्नाय कस्याश्रयं कुर्यात् ?*

=०=